**समर्थविषये**

# एकांकिकाः

**संस्कृतमधील पाच एकांकिका**

**प्रा. मनोहर राईलकर**

लेखकः प्रा. मनोहर राईलकर
जन्मदिः ९ ऑगस्ट १९२९
एम.एस्सी (सांख्यिकी, मुंबई), एम.एस्सी (गणित, पुणे)
स.प.महाविद्यालय, पुणे इथं ३४ वर्षं गणिताचे प्राध्यापक, २९ वर्षं गणित विभाग प्रमुख, ८ वर्षं विज्ञानशाखा उपप्राचार्य, ९ वर्षं नू.म.वि. मराठी व शिशुशाला प्रमुख, दीड वर्ष शि.प्र.मंडळी मुलींची शिशु व प्राथमिक शाळा प्रमुख, अडीच वर्षं वि.रा. मूकबधिर विद्यालय प्रमुख, १० वर्षं बालभारती गणित समिती मानद सभासद, १० वर्षं माध्यमिक शालांत परीक्षा मंडळाच्या गणित अभ्यास मंडळ मानद सभासद, गणितावर अनेक पुस्तकं, लेख व भाषणं, अनेक कादंबऱ्या, लघुकथा, विज्ञानकथा. बालवाडी ते पदव्युत्तर विद्यार्थ्यांशी प्रत्यक्ष संपर्क असणारे महाराष्ट्रातले बहुधा एकमेव शिक्षक. पत्ताः 'मृण्मयी', ५६ जेधे नगर, बिबवेवाडी, पुणे, ४११ ०३७, किंवा डॉ. राईलकर हॉस्पिटल, कदम वस्ती, पोस्ट लोणी काळभोर, ४१२ २०१, महाराष्ट्र, भारतवर्ष. भ्रमण - ९८२२०६७६१९ railkar.m@gmail.com
अक्षरजुळणीः प्रा. मनोहर राईलकर

सर्व हक्कः प्रा. मनोहर राईलकर

सूचनाः ह्या पुस्तिकेतील कोणत्याही एका वा अनेक एकांकिकांचे प्रयोग, वाचन, इत्यादी कोणत्याही प्रकारे, स्पर्धेत किंवा अन्यत्र, विनामूल्य वा तिकीट लावून करायचे असतील तर लेखकाची लेखी पूर्वमान्यता घेणे आवश्यक आहे. अन्यथा ते प्रयोग अवैध ठरतील.

इयं कलाकृतिः

मम द्वाभ्यां गुरुभ्यां

## ल.पां. फाटकगुरवे

## ग.पां.लोंढेगुरवे

च

अत्यादरेण

समर्पिता



रसिकाः, संस्कृतप्रेमिणः च,
नमो नमः। अद्यावधि, महाराष्ट्रभाषायां, आंग्लभाषायां च गणितपुस्तकानि, ईषत् ललितसाहित्यमपि च अहं लिखितवान्। परम् एतत् पुस्तकं संस्कृतलेखने मम प्रथम एव प्रयासः।

पुण्यपत्तने वर्तत्या भावेस्कूलनाम्न्याः शालायाः छात्रः भूत्वा १९४५ तमे खिस्ताब्दे शालांतपरीक्षा मया उत्तीर्णा। संस्कृतभाषां प्रति रुच्याः कारणं मम द्वौ गुरू। गुरुवर्यः श्री. ल.पां. फाटकः तथा च गुरुवर्यः श्री. ग.पां. लोंढेशास्त्री। चतुर्थकक्षायां (अधुना अष्टमकक्षायां), यत्र प्रथमं संस्कृतं शास्यते तत्र फाटकगुरूणाम् सकाशात्, पश्चाद् लोंढेगुरूणां सकाशात्, संस्कृतज्ञानं संपादितं, रुचिः च प्राप्ता। हतभागः अहं यतः उभयोः कोऽपि संप्रति न विद्यमानः। एषा कलाकृतिः उभाभ्याम् एव समर्पिता।

पुण्यपत्तनस्य श्रीमता कै. ह.त्र्यं. देसाईमहोदयेन पुरा, **मनोबोधः** इति श्रीसमर्थस्य 'मनाचे श्लोक' पुस्तकस्य संस्कृतरूपांतरं कृतम्। अत्रस्थाः केचित् श्लोकाः तस्मात् पुस्तकात् तत्रभवतः कृपया, अनुमत्या च उद्धृताः।

तदापि संप्रति संस्कृतस्य तादृग् अभ्यासः नास्ति, यादृग् इष्टः। तेन नैकाः प्रमादाः संभाव्याः। तेषां कृते अहमेव उत्तरदायी। परं ते क्षंतव्याः, तान् सर्वान् च ज्ञापयंतु माम् भवंतः रसिकाः, इति प्रार्थये।
मनोहरः

# नारायणः गृहमागच्छति।

(पात्राणि समर्थः, तस्य माता, श्रेष्ठः नाम ज्यायान् भ्राता तथा गंगाधरः, श्रेष्ठस्य पत्नी। प्रातःकालः, द्वितीयः प्रहरः। पूजामग्नः श्रेष्ठः, जपपरायणा माता, तंडुलान् शोधयन्ती पत्नी। ततः प्रविशंति।)

श्रेष्ठः (गायति।)

विना रामभक्त्या किमपि न श्रेयः, साराणां हि सारं रामनाम।।
कल्पनाविस्तारो नश्यते समूलं, तत्र कल्पतरोः कार्यं नास्ति।।
मनसि न कामो रामनामगानात्, कुतस्तत्र कार्यं कामधेनोः।।
रामगुणगानान्नावशिष्टा चिंता, तत्र चिंतामणेः कुतः कार्यं।।
रामदासो ब्रूते, विना रामभक्त्या जानीयाद् विफलं विश्वं सर्वम्।।

माता (आत्मगतम्) एतत्तु ह्यस्तनेन हरिदासेन गीतम् एव गानम्।। (प्रकाशम्) तात गंगाधर, ननु श्रूयते कच्चित्?

श्रेष्ठः (गायने मग्नः सन् अनुश्रोतुम् असमर्थः) किमंब, किं कथ्यते?

माता पृच्छामि, ह्यस्तने सायंकाले, मंदिरे नामसंकीर्तनं भूतं...

श्रेष्ठः ततस्ततः?

माता त्वया श्रुतम्।

श्रेष्ठः श्रुतं श्रुतम्, अस्माभिः सर्वैः श्रुतम्। ततः?

माता नामसंकीर्तने एतदेव पदं गीतं हरिदासेन, यत्त्वं गायसि संप्रति।

श्रेष्ठः सत्यं, तदेव गायामि इदानीम्। अतीव मधुरम्। लुब्धोऽस्मि। तत एव गायामि तत्। तस्य नाम अपि रामदासः इति मन्ये। भणितं नु स्वयं रामदास ब्रूते, इति? अस्तु, ततस्ततः?

माता किं मन्यसे?

श्रेष्ठः अतीव उत्कृष्टमासीत्। मया अद्यपर्यंतम् एवं पांडित्यपूर्णं निरूपणं तथा च मधुरं गायनं न श्रुतं कदा। भजनगीतानि अपि श्रुतिमधुराणि। न पुरा कदा श्रुतानि कति मधुरः तस्य कंठरवः। संगीतज्ञानमपि निर्दोषम्। अनेकशः नयने बाष्पाकुले भूते। आः। आत्मानं निरोद्धुमपि कठिनम्। इदानीमपि तादृशी एव स्थितिः मम। तथा...

माता (मध्ये तमाक्षिप्य) अलमलम्। न तदहं प्रष्टुकामा।

श्रेष्ठः ततः किं ज्ञातुमिच्छसि अंब? वदतु तावत्।



माता अपि नानुगम्यते यद्धरिदासस्य कंठरवः श्रुतपूर्वः इति?

श्रेष्ठः तत्त्वतः मया न परिच्छिन्नः तस्य स्वरः। को जानाति अपि तस्य नाम रामदासः अस्ति न वा? अपि तु अंब, न जाने किमर्थम् एतस्मिन् मे सोदरस्नेहः उत्पद्यते। स्मर्यते केनापि कविना उक्तं, व्यतिषजति पदार्थानांतरः कोऽपि हेतुः, इति?

माता तथैव मन्ये। कोऽस्ति एषः? राम एव जानाति। (निःश्वासः।)

श्रेष्ठः अंब जांबग्रामे न खलु केनापि दृष्टपूर्वः, श्रुतपूर्वः वा।

माता अहं तु किमपि द्रष्टुम् असमर्था। कथं पश्यामि तम्? (दीर्घं निःश्वस्य)

पत्नी किमर्थं मुहुर्मुहुः आत्मनः अक्षमदृष्टेः निर्देशः क्रियते भवत्या? अविरतम् अश्रुपातं कुर्वत्या विलप्यते। तेनैव भवत्या दृष्टिः निर्गता। सदैव नारायणस्य नाम एव जपति। नारायणः नारायणः नारायणः, कुत्रास्ति मम नारायणः? किं खादति एषः? कुत्र स्वपिति मम वत्सः? राम एव जानाति। स एव तस्य रक्षणकर्ता, इति।

माता (किंचिद् रुष्टस्वरेण) अपि अलीकमस्ति किमेतत्? विदितं खलु ते, न क्षणोऽपि सोढः तेन मया विना। न वा मया विना कदा कृतम् अन्नभक्षणमपि। केन स्मर्यते कति वर्षाणि व्यतीतानि तस्य गतस्य?

श्रेष्ठः अथ गणयस्व अंब। स मत्तः अवरः त्रिवर्षैः, यदा स विवाहमंडपात् पलायितः तदा स द्वादशवर्षीयः। अद्य अहं सप्तत्रिंशद्वर्षीयः। (अंगुलिभिः संकलयति) द्वाविंशतिवर्षाणि वर्षाणि व्यतीतानि पलायनस्य।

माता (रुष्टा) अलं गणनया। तन्न ज्ञातुकामा।

श्रेष्ठः ततः किमंब?

माता अपि एतस्य हरिदासस्य स्वरः परिचितो न भासते? मां तु स नारायणमेव स्मारयते। (गंगाधरः तस्य पत्नी च परस्परं दृष्ट्वा स्मयमानौ) नारायण एव एषः।

श्रेष्ठः अंब, कस्यचनापि नूतनस्य स्वरः ते परिचितः नारायणस्य च इव एव भासते तुभ्यम्। कुतो नारायण इदानीम्? (नैराश्यसूचकः शिरःकंपः, दीर्घनिःश्वासः च) हन्त, क्व गतोऽस्ति वत्सः? को जानाति? (पुनर्निःश्वासः) हन्त, द्वाविंशतिर्षाणि गतानि?

माता (निःश्वसित्वा) अपि त्वया न दृष्टः सः?

श्रेष्ठः कः अम्ब?

माता स्वयं हरिदासः? कोऽन्यः?

श्रेष्ठः आम् आम्, दृष्टः। ततः किम्?

माता अपि त्वया ज्ञातः नु तस्य भालस्थितो गंडः? स्मर्यते ननु, यद् बाल्ये स नद्याम् पतितः आसीत्?

श्रेष्ठः स्मरामि हन्त, स्मरामि। परं कीर्तनसमये तस्य वामभागे आसन्। अपि तु भालगंडः दक्षिणभागे आसीत्, इति स्मर्यते।

माता तात, अद्य सायंकाले अपि, यदि स मंदिरे नामसंकीर्तनं करिष्यति...।

श्रेष्ठः किं तेन? अद्य अपि वयं सर्वे गमिष्यामः।

माता नाहम्। परं त्वं निरीक्षस्व तस्य भालम्। अपि पश्यसि किम्?

श्रेष्ठः किमंब, किं ते आज्ञा विलंब्यते कदा मया? अहमवश्यमेव तं...

(नेपथ्ये श्लोकपठनध्वनिः श्रूयते।

प्रभाते हृदि श्रीहरिश्चिंतनीयः
ततो वैखरी तज्जपे योजनीया।
सदाचारमेतं हितं न त्यजेद्यः
स एवास्ति लोके मनुष्येषु धन्यः।।
जयतु जयतु श्रीरघुवीरः समर्थः।।

सर्वे स्तिमिताः, तेन तूष्णीं भूत्वा परस्परान् अवलोकंते। क्षणकालात्)

श्रेष्ठः (सहर्षम् आत्मगतम्) हन्त, एष तु स एव। न जाने किं, मम हृदयं कंपते, अस्य स्वरेण। (प्रकाशम्) एष ह्यस्तनः हरिदासः। न काऽपि शंका। अपि अभिगम्यते अंब, तस्य कंठरवः?

माता असंशयम्। (उत्थातुं यतते, परं न शक्यम्। आत्मगतम्) अभिज्ञातं मयाऽपि। अयं नारायणः एव। (प्रकाशम्) वत्से पुत्रवधू, पश्य कोऽपि साधुः द्वारि तिष्ठति। न क्षणमपि विलंब्यते। आदरेण प्रवेशय तं गृहम्। (हृदये हस्तं निक्षिप्य, आत्मगतम्) अपि अस्ति किमेष मम वत्सः? पुनरागतः?

पत्नी यदाज्ञापयति भवती। (तंडुलान् गृहीत्वा बहिरागच्छति। तत्र साधुं दृष्ट्वा प्रणिपतति।) भगवन् अभिवादनम्।

साधुः (मुखे सदैव स्मितम्) स्वस्ति ते। सौभाग्यवती भव। (पश्चात् तूष्णीं तिष्ठति। भिक्षापात्रं च न पुरस्करोति।)



पत्नी (मनसि शंकिता) कुत्र अत्रभवतः भिक्षापात्रम्?

साधुः अंब, न कामपि भिक्षाम् अपेक्षे। न खलु किमपि कांक्षितम् वा।

पत्नी (स्तिमिता) न भिक्षाकांक्षा? अपि कुपितः किम् अत्रभवान् अस्मासु? (आत्मगतम्) कोऽस्ति एष साधुः यो भिक्षामपि नापेक्षते? अपि वयं कृतापराधाः चेत् तदा क्षंतुमर्हति अत्रभवान्।

साधुः (सस्मितम्) न केनापि किंचिदपराद्धम्।

पत्नी ततः किम्?

साधुः (स्मयमानः) अपि केनापि स्वगृहं याच्यते?

पत्नी (अतीव विस्मिता, हनुं अंजलीं निक्षिप्य, आत्मगतम्) स्वगृहम्? किं कथयितुं प्रयतते एषः? (प्रकाशम्) हं, गृहीतः अत्रभवतः अभिप्रायः। ततः, एतत्तु अत्रभवतः एव गृहम्। भवतु। तदा किमिष्यते अत्रभवता? अंतो वा प्रविशतु। (हस्तेन सूचयते)

साधुः मन्ये नाभिज्ञातोऽस्मि प्रजावत्या, इति।

पत्नी (विभाव्य, आत्मगतम्) प्रजावत्या? किमेवं वदति एषः? अयं साधुः उत नारायणदेवरः? शक्यमेतत्? (प्रकाशम्) सत्यम्, नाभिजाने। कोऽस्ति अत्रभवान्?

साधुः अहं तव देवरः, प्रजावति। गंगाधरार्यस्य श्रेष्ठस्य अनुजोऽहम्। अहं...अहं नारायणः। (सा तं किंचित्कालं सूक्ष्मतया निरीक्षते। पश्चाद् विस्मयचकिता वदने हस्तं निक्षिप्य सानंदं धावंती अंतो गच्छति। अत्रांतरे श्रेष्ठोऽपि धावन् बहिरागच्छति।)

श्रेष्ठः (साधोः भालगंडम् अवलोक्य) सत्यं नु स्वप्नं नु? (बाष्पसंयुते नयने उपवस्त्रेण स्पृशति। अनंतरं तं परिष्वजते।) रे नारायण, कति वर्षाणि व्यतीतानि? युगानि। (तस्य स्कंधयोर्हस्तौ निक्षिप्य कुतूहलेन तं अवलोकते।) अतो महान् खलु संवृत्तः। क्व आसीः रे तात? ह्यस्तने त्वया नामसंकीर्तनं कृतम्। मया तथा मात्राऽपि श्रुतम्। अतीव मधुरः तव कंठः। त्वया एव रचितं तद् गानम्? अपि त्वं स्वयं रामदासः?

नारा० (मूर्ध्ना अनुमोदते। सस्मितम्) हन्त, मयाऽपि अवलोकिता यूयं सर्वे।

श्रेष्ठः एवम्? अपि वयं सर्वे अभिज्ञाताः? (नारायणः शिरःकंपेन अनुमतिं

सूचयति।) तदा (कृतककोपेन तस्य स्कंधे चपेटप्रहारं कृत्वा) ह्यस्तने एव परिचयः न दत्तः रे दुष्ट? (नारायणः स्मयमानः तूष्णीं तिष्ठति।) भवतु। किं तु अंबया तव स्वरः तत्क्षणमेव अभिज्ञातः। अहमेव मूर्खः। नाभिज्ञातः तव स्वरः मया वत्स। सा मुहुर्मुहुः वदति, एष मे नारायणस्य एव कंठरवः, इति। एतस्य हरिदासस्य स्वरः मां नारायणमेव स्मारयते। अरे, किमिदानीं विलंब्यते मया? पुनरपि मन्मूर्खत्वम्। गच्छाव मातरम्। क्षणमेकं तात, शृणु, अंबा तव स्मरणं कुर्वती अविरतं विलपति। तेन तस्या दृष्टिः निर्गता। सा...सा...द्रष्टुं न शक्नोति।

नारा० ह्य एव ज्ञातं मया। हा, कीदृग् दुष्टोऽस्मि। युज्यते, यदुक्तं जगद्गुरुभिः शंकराचार्यैः, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति, इति। मया अंबायै महद्दुखं दत्तम्। (निःश्वसति। वार्तां कुर्वंतौ अंतः प्रविष्टौ।)

श्रेष्ठः पश्य अंब। कः प्रपन्नः इदानीम् अस्मभ्यं मिलितुम्।

माता किं वदसि रे वत्स? अहं तु अंधा, कथं पश्यामि? कस्ततः, मम एका एव कांक्षा अवशिष्टा संप्रति। एकवारं नारायणं एव द्रष्टुमिच्छामि तदनंतरम्...(मूर्धानं चालयंती विरमति।) भवतु। तेन विना कमपि न मिलितुमिच्छामि।

श्रेष्ठः (हसति) स खलु एव आगतः अंब।

माता (न विश्वसिति। हृदये हस्तं निक्षिप्य) कः आगतः? किमुक्तम्?

श्रेष्ठः नारायणः स्वयं, स एव आगतः अधुना।

माता (आत्मगतम्) नारायणः? (मूर्धानं चालयति) नारायणः? (उत्थातुं यतते, न शक्यम्) नारायणः? (अर्धोक्ते हर्षेण बाष्पकंठी विरमति। हस्तौ चालंती नारायणं स्पर्शितुं यतते। प्रकाशम्) कुत्र मम वत्सः? कुत्रास्ति सः?

श्रेष्ठः अयि तात, अंबायाः समीपं उपसर्प। अतीव विरहदुःखिता कृतास्ति त्वया।

नारा० (उपसृत्य, तस्याः चरणौ स्पृशति।) अंब, पादप्रणामं करोमि। तव कुपुत्रः तव समीपं प्राप्तः। आशिषं देहि।

माता आयुष्मान् भव। हन्त, (कुपितस्वरेण) मम कोऽपि कुपुत्रो न जातः। तात, क्व आसीः रे चिरकालम्? कुत्र भोजनं कृतम्? कुत्र



विश्रम्यते? (तस्य मस्तकं जिघ्रति मस्तकं चं मुखं स्पृशति) ओः! परिव्राजकोऽसि किम्?

नारा० (हसति) आम् अंब, अधुना परिव्राजकोऽस्मि। किं तु अंब त्वमतीव कृशशरीरा? अपि अतिदुःखात् किम्?

माता (नयनयोः अश्रुपातः आरभ्यते।) पल्लवेन नयने स्पृशति। अहं तु अंधा। त्वां द्रष्टुं नितरामसमर्था।

पत्नी भवतः स्मरणेन अविरतं रुदत्या अत्रभवत्या दृष्टिर्निर्गता। सदा भवतः एव नाम जपति।

नारा० परं प्रजावत्या नाहम् अभिज्ञातः। (हसति। सा लज्जां नाटयति।)

श्रेष्ठः सा केवलमेका बाला, यदा त्वं पलायितः।

नारा० आम्, भवतु। कथं संति सर्वे? त्वं कथमसि अंब?

माता एका एव कांक्षा तात। नान्याकाऽपि।

नारा० किमच्छसि अंब?

माता को लाभः? न मम स्पृहा कदा सफलतां यास्यति।

नारा० परं का तव वांछा? कथय तां तावत्।

माता त्वाम् एकवारं द्रष्टुकामा। काऽन्या शक्यते? परं सा तु नितराम् असंभाव्या।

नारा० (अपवार्य) हन्त! तावदेव अस्या मनोरथान् संपादयिष्यामि। (प्रकाशम्) किमेवम्? तव दर्शनेच्छा अवश्यमेव सफलतां यास्यति अंब। (सर्वे विस्मिता।)

पत्नी (सानंदं साश्चर्यं च) न खलु।

श्रेष्ठः (आश्चर्येण) एवं नारायण? अंबा पुनरपि द्रष्टुं शक्नोति? कथमेत् शक्यम्?

नारा० (तं प्रति दृष्ट्वा, मूर्ध्ना एव अनुमन्यते।) विश्रब्धा भवंतु सर्वे।

पत्नी (विस्मिता) अपि सत्यमेतत्? (तां प्रति समर्थः स्मयते। पश्चाद् उपवस्त्रात् किमपि मूलं गृहीत्वा मातुर्नयने स्पृशति। सा इतस्ततः पश्यति।)

माता नारायणम् आपादमस्तकं निरीक्षते। नयने अश्रुपूर्णे। पल्लवेन स्पृशति। पुनः तं दृष्ट्वा सहर्षं तथा साशंकम् आत्मगतम्।) सत्यम्? (पुनः इतस्ततः पश्यति।) एष नारायणः? (प्रकाशम्) अपि त्वं नारायणः?

न विश्वसिमि।

नारा० (सस्मितम्) किमर्थम् आशंका अंब? अहं तव पुत्रः नारायणः। नान्यः। सत्यमंब। सत्यं खलु।

माता स्वरः तु अभिज्ञाता किं तु मम नारायणः कश्चिच्छिशुः आसीत्। (सर्वे हसंति।)

नारा० सत्यम् अंब, तव पुरतः अहम् अद्यापि शिशुः एव।

श्रेष्ठः हं! केवलं चतुस्त्रिंशद्वर्षीयः शिशुः। (हसति।)

नारा० सत्यम्। परम् अंब, यदीच्छसि चेद् एनं चतुस्त्रिंशद्वर्षीयं शिशुं ताडयितुमपि शक्यम्। (सर्वे हसंति।)

माता आशंकसे रे किं शठ? पुरा बाल्ये न कदा ताडितोऽसि मया। किं तु अद्य अवश्यमेव ताडयिष्ये। तव, अस्मान् सर्वान् विरहाग्नौ प्रक्षिप्य कृतं पलायनं, खलु कठोर-शासनयोग्यम्। (पुनः सर्वे हसंति।)

नारा० अंब, विवाहमंडपे ननु पुरोहितैः एव भणितं 'सावधानम्' इति? अपि स्मर्यते?

श्रेष्ठः तथैव वदंति ते। ततः किम्?

नारा० तदा सावधानेन मया अंगीकृतं पलायनम्। (सर्वे हसंति।)

श्रेष्ठः रे शठ किमेवं भणसि? अंब जानासि ननु, बाल्येऽपि एष सदा एकांतप्रियः कदाऽपि कस्यायां गुहायां प्रविश्य सर्वान् उद्विग्नान् कुर्वन् दीर्घकालं निलीनः अभवत्? पृष्टे सति अकथयत्, 'विश्वकल्याणं चिंतये' इति।

माता अलं मम वत्सस्य निंदया।

श्रेष्ठः पश्य नारायण, अधुना त्वं मत्तः प्रियतरो भवसि अंबायाः। दुर्भाग्यं मम। (सर्वे हसंति।)

नारा० दूरतरः स प्रियतरः खलु।

माता शृणु रे शठ, अतो त्वां कुत्रापि गंतुं नानुमोदयिष्ये।

श्रेष्ठः युज्यते अंब। नूनं न अनुमोदयिष्यामहे एनं पुनर्गंतुं कदा।

माता किं रे नारायण, त्वं महान् साधु भूतः इति दृश्यसे। कुत्र प्राप्ता एषा विद्या? अपि कश्चन पिशाचः प्रसन्नोऽस्ति किम्?

श्रेष्ठः केनापि पिशाचेन वा स्वयं गृहीतोऽसि? (हसति।)



नारा० (गभीरो भूत्वा) सत्यमंब, कश्चन महान् पिशाचः मयि प्रसन्नः। तस्य एव अनुग्रहः एषः।

सर्वे (साश्चर्यम्) एवम्? पिशाचः? कथं सः?

नारा० (क्षणकालं मनसि चिंतयति। गायति) एष पिशाचो मयि प्रसन्नः।

(सर्वे हस्तौ युंजाना अनुसरंते। अत्र किमपि तालवाद्यम् इष्टम्।)

पुराधिष्ठितो यो वैकुंठम्। ततो विशति योऽयोध्यानगरीम्।
कौशल्याया उदराज्जातः। एष पिशाचो मयि प्रसन्नः।।
सदाशिवो यं जपत्यखंडम्। अतिप्रियो यो नगरवासिनम्।
दशरथस्य यो कुलावतंसः। एष पिशाचो मयि प्रसन्नः।।
भ्रमन्नटव्यां लक्ष्मणेन सह। तत्राहल्या कृता पावना।
हता ताटका कृत्या येन। एष पिशाचो मयि प्रसन्नः।।
ततो गतो यो मिथिलानगरीं। भग्नकृतं शिवचापं येन।
परिणीता जानकी च पश्चात्। एष पिशाचो मयि प्रसन्नः।।
तत्कैकेय्या वचनात् पश्चात्। पित्राज्ञापालनहेत्वर्थम्।
स्वीकृतश्च वनवासं येन। एष पिशाचो मयि प्रसन्नः।।
सुग्रीवस्य हि कपिराजस्य। प्राप्ता येन च तत्र मित्रता।
मारुतेरपि प्रभुता येन। एष पिशाचो मयि प्रसन्नः।।
रावणस्य कुलनाशं कृतवान्। सीताया अपि कृता मुक्तता।
बिभीषणं स्थापितवान् राज्ये। एष पिशाचो मयि प्रसन्नः।।
जयतु जयतु श्रीरघुवीरः समर्थः।

सर्वे (उत्तिष्ठंति, नमस्कृत्य च प्रार्थयंते।)

महासंकटान् मोचिता येन देवाः
प्रतापे बले यो गुणेष्यद्वितीयः।
स्मरत्यद्रिजा शूलपाणिस्तथा यं,
न कुर्यादुपेक्षां स दासाभिमानी।
जयतु जयतु श्रीरघुवीरः समर्थः।

जवनिका

## वाचासिद्धः

(पात्राः - समर्थः, तस्य कतिपयाः शिष्याः, तेषाम् एकस्य नामधेयं वासुदेवः इति। कोऽपि पंडितः वाचासिद्धः नाम, तस्या वृद्धा पत्नी, कश्चन नागरः।)

(नेपथ्ये ध्वनिः श्रूयते - ॐ भवति भिक्षां देहि। तथा च श्लोकगायनम् - प्रभाते हृदि श्रीहरिश्चिंतनीयः, ततो वैखरी तज्जपे योजनीया। सदाचारमेतं हितं न त्यजेद्यः, स एवास्ति लोके मनुष्येषु धन्यः।। जयतु जयतु श्रीरघुवीरः समर्थः।। ॐ भवति भिक्षां देहि। ततः प्रविशति वासुदेवः। कस्यापि सदनस्य पुरतः गायति।)

वासु० मनः सन्मते भक्तिमार्गो हि सेव्यः,
तदा श्रीहरिः प्राप्यते लीलयैव।
जनैर्निंदितं सर्वमेवात्र वर्ज्यं,
जनैः श्लाघितं सर्वभावेन कार्यम्।।

जयतु जयतु श्रीरघुवीरः समर्थः।। ॐ भवति भिक्षां देहि।

(नेपथ्ये - इयमस्मि, इयमस्मि। क्षणमेकं तिष्ठतु भिक्षुः। क्षणेन प्रविशति काऽपि वृद्धा हस्ते पात्रम् धारयती, सस्मितम्।)

वृ० कति मधुरः तव स्वरः रे बालक। गानस्य शब्दा अपि मधुराः। (नयने पिधाय) अहह, मनः सन्मते भक्तिमार्गो हि सेव्यः...तदनंतरम्? कथय बालभिक्षो। पुनर्गायतु।

वासु० संतुष्टोऽस्मि अंब। एष गायामि पुनः। शृणोतु भवती। (गायति।)

वृ० कस्य काव्यम्? अतीव अर्थमधुरम् एतत् काव्यम्।

वासु० अस्माकं गुरुदेवस्य। स एकः महान् साधुः।

वृ० अस्तु। कुत्र ते भिक्षापात्रम्? पुरस्करोतु तम्।

(वासुदेवः भिक्षापात्रं पुरस्करोति। सा सस्यानि प्रक्षिप्तुम् आरभते। ततः प्रविशति सहसा तस्याः पतिः।)

स्वामी० (कुपितः तां रुध्वा) किं करोषि मूढे?

(तस्या हस्ताद् भिक्षापात्रं क्रोधेन कर्षति।)

वृ० (दुःखेन) किमेतत्। न तादृग् शोभनीयम् अस्माकं गृहस्थानाम्।

स्वामी न दातव्या काऽपि भिक्षा। एते सर्वे चोराः, किमपि कर्म न कर्तुं न यतते। अलसाः सर्वे। बहु अश्नंति च। (शिष्यं प्रति) पुनश्च



अस्माकं द्वारं न कदा आगंतव्यम्। अवगतं किं रे चोर?

वासु० नाहं चोरः अत्रभवान्, वयं सर्वे संन्यासिनः।

स्वामी चोरः।

वृ० एवं किं वदति स्वामी? नैष चोरः। केवलं कश्चन संन्यासी, कश्चिद् बालभिक्षुः। कियान् अर्थगर्भः, शब्दसुंदरः च अस्य गुरुदेवस्य श्लोकः। मनः सन्मते भक्तिमार्गो हि सेव्यः तदा श्रीहरिः प्राप्यते लीलयैव। अहह, येन यादृग् अर्थपूर्णं काव्यं लिखितं न स कदाऽपि चोरः संभाव्यः। न तस्य कोऽपि शिष्यो वा।

(तस्य हस्ताद् पात्रं गृहीत्वा सा पुनः भिक्षुं दातुं यतते। परं स पुनः तस्या हस्ताद् आछिनत्ति।)

स्वामी न काऽपि भिक्षा दातव्या एनम्। गच्छ रे वैधेय।

वृ० एवं किं करोषि? एतद् अस्माकं गृहस्थधर्मः। अपि तस्य पालनम् अस्माकं कर्तव्यं नास्ति किम्? न रोद्धव्याऽहम्।

स्वामी अलमलम्। एते सर्वे कापटिकाः, छद्मतापसा दांभिका बकवृत्तयः। सत्यतः न संन्यासिनः याथार्थ्येन।

वृ० किमर्थं संन्यासिनम् अपशब्दान् भाषते स्वामी?

स्वामी (वासुदेवं प्रति) न पुनः कदा आगंतव्यम् अस्माकं गृहम्। पुनः दृष्टः शापयोग्यः भविष्यसि। गच्छ, गच्छ, मा तिष्ठ अत्र क्षणमपि। न मर्षयामि पुनः तव दर्शनम्।

वृ० परम्...

स्वामी निवारय स्वाम् अस्मद् विषयात्। अंतो वा गच्छ। (दुःखेन निष्क्रांता, वासुदेवं प्रति) किमर्थं तिष्ठसि? न श्रुतम्? जीवितुं चेच्छसे मूढ, शापं वा दास्यामहे?

वासु० क्षमस्व भद्र। एष गच्छामि। परं ददातु मह्यं मे भिक्षापात्रं भद्रः। (परं स तं पात्रं न ददाति।)

स्वामी न दास्यामि। गच्छ रे मूढ। (निष्क्रांतः।)

वासु० (स्वगतम्) अतः किं क्रियते? न उचितं मन्ये भिक्षार्थम् अन्यानि गृहाणि गमनम्। (कोणे स्थित्वा दूरतः पश्यन् कोऽपि नागरः पुरस्सरति।)

ना० अयि बालभिक्षो, न कदाऽपि पुनरागंतव्यम् अस्य गृहम्। अतीव

कुटिलः गृहस्य स्वामी। स्वामिनी साक्षात् करुणामूर्तिः। परम् अयं वाचासिद्धः।

(वार्तां कुर्वंतौ प्रतिष्ठतः।)

वासु० वाचासिद्धः नाम? कथयतु किमपि भद्रस्य विषये। पश्चाद् गुरुदेवाः अपि पृच्छंति। तान् अपि सर्वं कथनीयम्।

नागरः केनापि बालकेन एकदा अस्य स्वामिनः उद्यानस्थानि कानि पुष्पाणि उद्गृहीतानि। अनेन तं घोरः शापः दत्तः। दिनांतरेण वराकः बालकः मृतः।

वासु० आः कियत् क्रौर्यम्। अपरम्?

नागरः अपरम्, एकदा...(वार्तां कुर्वंतौ निष्क्रांतौ। मध्यपटः उपरि गच्छति।)

(समर्थस्य मठः। स किमपि लिखति। ततः प्रविशति वासुदेवः। तं दृष्ट्वा अन्ये बहवः शिष्याः परिष्वजंते।)

एकः किमिति चिरायितं त्वया?

वासु० कथयामि। (समर्थं प्रति गत्वा प्रणमति) जयतु श्रीरघुवीरः। (दुःखेन विदीर्णां तस्य मुद्रां दृष्ट्वा पृच्छति)

समर्थः किमर्थं एवं विलंबः? चिंताग्रस्ता वयं सर्वे। अस्तु। किमासीत्? कुत्र ते भिक्षापात्रम्? एवं भीतो किं दृश्यसे?

वासु० गुरुदेव, नाहं गच्छामि तद्गृहं पुनः।

समर्थः किं गृहम्? किमभवत्? किमर्थं बिभेषि? कथय सर्वं तावत्। (समर्थः सदैव स्मयमानः। स किमपि न भाषते।) अस्तु। श्वः अन्येन केनापि गंतव्यं तद्गृहम्।

वासु० मा मैव। न कोऽपि अन्यः अपि प्रेषितव्यः तद्गृहम्। केनापि नागरेण कथितं गृहस्वामी वाचासिद्धः। स यद् वदति तत् सर्वं तथैव भवति, इति। शप्स्यते अपि।

समर्थः (स्मयते) मा बिभेहि। (वासुदेवः शिरः चालयति।) तद्गृहं तु न गंतव्यम्। कमपि अन्यं प्रेषयिष्यामहे।

वासु० नान्यं कमपि प्रेषितव्यं गुरुदेव। एवं इच्छंति स्वामिनः चेत्, तदा स्वयमेव गमिष्यामि।

समर्थः अस्तु। पश्यामः श्वः प्रातः। अधुना गच्छ अंतः। अन्यैः शिष्यैः भिक्षा प्राप्ता। पूजां कुरु। पश्चाद् भोजनम्। तत् सिद्धम्। भोजनांते कथय। परं श्वः कोऽपि गमिष्यति तेन अन्यः श्लोकः गेयः।



अन्यः कश्चन श्लोकः गुरुदेव?

समर्थः इदानीमेव लिखामः। कथयिष्यामः श्वः प्रातः।

(किंचित् कालम् अंधकारः, पश्चात् प्रकाशः। अपरः दिनः, सर्वे शिष्या भिक्षार्थं सिद्धाः।)

समर्थः को गंतुं सिद्धः तद्गृहम्?

वासु० स्वयमेव गमिष्यामि, गुरुदेव।

समर्थः (स्मयते) न किंचिदपि भयम् मनसि?

वासु० भयं तु ह्यः आसीत्। अतः कुतो भयं गुरुदेव, यत्र भवत्सु स्वयमेव रक्षत्सु अस्माकम्? इदानीं न भयम्। एष गमिष्यामि तद्गृहम्।

(सर्वे निष्क्रांताः मध्यः पटः अवपतति। ह्यस्तनं गृहं दृश्यते। नागरः अपि कोणे दृश्यते। वासुदेवं दृष्ट्वा पुरस्सरति। ततः प्रविशति।)

नागरः अंग, बालभिक्षो! पुनरागच्छसि? अपि प्राणा न प्रियाः?

वासु० प्राणाः तु सर्वेषां प्रियाः। परं गुरोराज्ञा न विचारणीया। तैः गंतुं कथितं तदा आगतोऽस्मि। (स्मयते।)

नागरः हससि? न मृत्युभयं मनागपि? कथं तव गुरुदेवः यः स्वशिष्यं घोरे संकटे निक्षिपति।

वासु० (पुनः स्मयते) मा बिभेहि। न किमपि भवति। अस्माकं गुरुदेवा महांतः सामर्थ्यशालिनः।

(नागरः कोणे अपक्रमति, निरीक्षते। वासुदेवः गृहं गच्छति गायति च।)

वासु० समर्थस्य दासं स्वयं वक्रदृष्ट्या,<br>
क्षमो वीक्षितुं को नु भूमंडलेस्मिन्।<br>
यदीयं यशो वर्ण्यते च त्रिलोक्या,<br>
न कुर्याद् उपेक्षां स दासाभिमानी।।<br>
जयतु जयतु श्रीरघुवीरः समर्थः।।

(नेपथ्ये श्रूयते - एष तु ह्यस्तन एव भिक्षुः। अधुना तं न मुंचे। घोरं शापं दास्यामि। - न खलु स्वामी, एतादक् कठोरः व्यवहारः न उचितः संन्यासिनः प्रति। न गंतव्यं बहिः सांजलिः प्रार्थये। एष कश्चिद् बालभिक्षुः। - शब्दमपि न वद। ततः प्रविशति गृहस्वामी। अतीव संतप्तः। तम् अनुचरति वृद्धा। स्वामिनः पृष्ठदेशे तिष्ठति, वासुदेवं संकेतं करोति, 'गच्छ, मा तिष्ठ अत्र,'

इति। परं स्मयमानः वासुदेवः तां दुर्लक्षते। तस्याः मुद्रायां चिंता दृश्यते।

स्वामी अये वैधेय। त्वं पुनर्दृष्टोऽसि? न भयम्?

वासु० कुतो भयम्? साक्षात् समर्थस्य दासोऽहम्। को नु भूमंडलेऽस्मिन् यो अस्माकं वक्रदृष्ट्या वीक्षितुं क्षमते?

स्वामी (सकोपम्) किं कथितं रे मूढ इदानीम्? कथय एकवारं पुनः।

वासु० एष कथयामि। (गायति।)

समर्थस्य दासं स्वयं वक्रदृष्ट्या,
क्षमो वीक्षितुं को नु भूमंडलेऽस्मिन्।

स्वामी (तं निरुध्य) अलम्। एषोऽहं वीक्षामि त्वां वक्रदृष्ट्या।

वृ० मा मैव स्वामिन्, प्रार्थयेऽहम्। एतन् न शोभनम्। गच्छ रे बालक, मा तिष्ठ अत्र क्षणमपि। मम स्वामी वाचासिद्धः। यद् यद् एष वदति, तत् तथैव भवति। (हस्तौ युंजाना) गच्छ, मा तिष्ठ क्षणमपि, इति प्रार्थये।

वासु० अंब मा बिभेहि। जहीहि सर्वां चिंताम्। अस्माकम् गुरुदेवा अति सामर्थ्याशालिनः। न किमपि भयं वर्तते मम। तदेव अहं कथयितुं प्रयते अनेन श्लोकेन। यदीच्छति चेत् शृणोतु माता पुनः।

समर्थस्य दासं स्वयं वक्रदृष्ट्या,
क्षमो वीक्षितुं को नु भूमंडलेस्मिन्।
यदीयं यशो वर्ण्यते च त्रिलोक्या,
न कुर्याद् उपेक्षां स दासाभिमानी।।
जयतु जयतु श्रीरघुवीरः समर्थः।।

वयं साक्षाद् गुरुदेवानां तथा श्रीरामस्य दासाः। न कोऽपि वर्तते अस्मिन् भूमितले योऽस्मान् वक्रदृष्ट्या वीक्षितुं समर्थो भवेत्।

स्वामी (कुपितः) एवम्? अतः शृणु।...

वासु० (सस्मितम्) एष शृणोमि। प्रकामं कथयतु भद्रः।

वृ० मा मैव स्वामिन्...

स्वामी (तां प्रति) गच्छ त्वम् अंतः। न क्षणमपि तिष्ठ। (अतीव दुःखिता निष्क्रांता।) शृणु अधुना, अद्य सूर्यास्तपर्यंतमेव जीवसि। पश्चात् सूर्यास्तसमये एव पंचत्वं गच्छसि। गच्छ कथय च तव महांतं गुरुदेवम्। (निष्क्रांतः।)



(वासुदेवः गंतुमारभते। तदा भीतः नागरः पुरस्सरति।)

नागरः (तस्य मुद्रां दृष्ट्वा) अहो आश्चर्यम्, न भयं लवमात्रम्?

वासु० भयम्? श्वः प्रातः आगमिष्यामि अत्र। पश्यतु भद्रः। एहि, गच्छावः।

नागरः श्वः प्रातः? न विश्वसिमि।

वासु० (स्मयते) पश्यतु भद्रः स्वयमेव श्वः। एष गच्छामि।

(भिन्नद्वाराभ्यां निष्क्रांतौ। मध्यपटः उपरि गच्छति। समर्थः तमेव प्रतीक्षते। तमवलोक्य सानंदम्)

समर्थः आगतोऽसि तात? वदतु तावत् कः शापः?

वासु० जानंति अत्रभवंतः? परं भीतोऽस्मि गुरुदेव। अद्य मम जीवनस्य अंतसमयः प्राप्तः। तेन अहं शप्तः।

समर्थः कः शापः?

वासु० अद्य सूर्यास्तपर्यंतम् एव जीविष्यामि। न तत्पश्चात् क्षणमपि।

समर्थः (स्मयते) अलं भीत्या। अत्र उपविश। परिधेहि एतद् वस्त्रम्। (वस्त्रं ददाति) अन्यस्य कस्यापि आह्वयतः न उत्थातव्यम्। एतद् वस्त्रमपि च न त्याज्यम्। श्वः प्रातःकाल-पर्यंतम् अवगतम्? प्रातः स्वयम् आह्वयिष्यामहे।

वासु० (शिरसा अनुमन्यते) परं गुरुदेव...

समर्थः मा बिभेहि लवमपि। परं न उत्थातव्यं कदा। (निष्क्रांतः।)

(सायंकालः। प्रकाशः क्षीणः। कोऽपि बहिस्थः पुरुषः वासुदेवम् आह्वयति। नेपथ्ये गभीरः ध्वनिः श्रूयते। पुत्र, अत्र मम समीपम् आगच्छ।)

वासु० न शक्यं न गुरोः आज्ञा। वस्त्रमपि न त्यजामि।

ध्वनिः परं एषा तु यमराजस्य आज्ञा। एहि बालक, त्वरितम् एहि।

वासु० न गुरोराज्ञा। तैः आज्ञापितं न उत्थातव्यं त्वया इति। वस्त्रमपि न त्यजामि। गच्छतु यदृच्छया भद्रपुरुषः।

ध्वनिः (कठोरस्वरेण) आगच्छ।

वासु० न उत्तिष्ठामि कदा। गुरोराज्ञा न अतिक्राम्या।

ध्वनिः (कठोरतमस्वरेण) उत्तिष्ठ तावदेव।

वासु० न उत्तिष्ठामि। (एवं पुनः पुनः द्विवारं त्रिवारं वा, भवति। प्रतिसमयं ध्वनिः क्षीणः क्षीणतरः भूत्वा विलयते। क्षणकालम् अंधकारः पश्चात् प्रकाशः, पक्षिणः प्रातःकालीनः ध्वनिः श्रूयते। ततः प्रविशति समर्थः।)

समर्थः वासुदेव, रे वासुदेव। प्रातःकालः प्राप्तः। उत्तिष्ठ तात। मुंच शय्याम्। अधुना न किमपि भयकारणम्।

वासु० आं? प्रातःकालः? चिरात् प्रतिबुद्धोऽस्मि। अहं जीवितः गुरुदेव? न मृतः? परं कोऽपि माम् आह्वयत्। वारंवारं उत्थातुम् अकथयत्। मया कथितं न उत्तिष्ठामि गुरोराज्ञा नास्ति, इति।

समर्थः स्थाने। तदेव उचितम्। तेन एव जीवितः तिष्ठसि संप्रति। अधुना पुनः गच्छ तमेव गृहम्। अपि गमिष्यसि नु?

वासु० पुनः तद्गृहम्?

समर्थः (स्मयते) भीतोऽसि किम्?

वासु० आज्ञा गुरुदेवाः, न काऽपि भीतिः। अवश्यमेव गमिष्यामि।

समर्थः तदा उत्तिष्ठ, प्रातर्विधिं स्नानं च कृत्वा भिक्षार्थं गच्छ। प्राग् गता एव अन्ये सर्वे।

वासु० एष गच्छामि।

(समर्थं प्रणम्य निष्क्रांतौ। अंधकारः पटलः अवक्रमति। यदा प्रकाशः, दृश्यते तद् गृहम्। वासुदेवः द्वारि घोषते ॐ भवति भिक्षां देहि। तं दृष्ट्वा)

नागरः (हर्षेण) अयि भिक्षो, जीवितोऽसि? दिष्ट्या रक्षितोऽसि गुरुणा।

वासु० (हसति) आं सत्यं गुरुकृपया एव। (गायति)

मनो मास्तु दुर्वासना ते कदापि,
मनः सर्वथा पापबुद्धिश्च माऽस्तु।
मनो मा त्यज श्रेयसीं धर्मरीतिं,
मनस्तेंऽतरे सारधीः सर्वदाऽस्तु।।
ॐ भवति भिक्षां देहि।

(नेपथ्ये - हन्त, एष तु स एव बालभिक्षुः। (उच्चैः) इयमस्मि, इयमस्मि। क्षणं स्थातव्यम्। प्रविशति।)

वृ० (हर्षभरिता) रे बालभिक्षो, अपि त्वं जीवितः?

वासु० (तं प्रणमति) अत्रभवती स्वयं पश्यति मां जीवितम्। तदाऽपि आशंकते अंबा?

वृ० न शंका रे तात। प्रत्युत अतीव मुदिताऽहम् यत्त्वं जीवसि। परं, कथमेष चमत्कारः?

वासु० अंब, गुरुदेवस्य कृपया। (ततः प्रविशति स्वामी। मुद्रायां भीतिः



दृश्यते।)

स्वामी अये त्वम्? न मृतः?

वासु० प्रत्युत, जीवितोऽस्मि।

वृ० अस्य गुरुदेवस्य प्रसादेन।

वासु० आं सत्यमेतत्। कथितम् अस्माकं गुरुदेवाः महान्तः सामर्थ्यशालिनः, इति। गुरुदेवानां प्रसादेन एव अहं जीवितोऽस्मि इदानीम्। न किंचिदपि प्रभविष्यति भद्रस्य कुविद्या तस्य सामर्थ्यस्य पुरतः।

स्वामी (वृद्धां प्रति) प्रातःकालाद् मम सर्वांगं दहति इति मन्ये।

वृ० भवान् अस्य गुरोः महान् अपराधी। तेनैव विकारयसि इदानीम्। किम् अन्यत् कारणं वा? रे बाल, तव गुरोः दर्शनानुग्रहम् इच्छामि। अपि शक्यं तद् न वा?

वासु० अवश्यम्। अस्माकं गुरुदेवाः साक्षात् करुणारूपाः।

वृ० तदा गच्छावः। (स्वामिनम् उद्दिश्य) किं न भवान् अपि संगच्छते आवाभ्यां सह? नूनम् अस्य गुरुदेवः कश्चन महान् विभूतिः दृश्यते। तस्य प्रसादेन अस्माकं सर्वेषां कल्याणम् एव भविष्यति। तव कायस्य दाहः अपि विनश्यति।

स्वामी मम मनसि भयम्। महान् अपराधी अहम्। मया अनंतानि पापानि कृतानि अद्यावधि। न कोऽपि क्षमिष्यति माम्। न कदाऽपि क्षंतुमर्हामि।

वासु० न हि भद्र, अस्माकं गुरुदेवाः नूनं हि करुणासागराः। आगच्छतु भद्रः अपि मया साकम्। (तस्य हस्तं स्वहस्तेन गृह्णाति।)

वृ० आगच्छतु भवानपि। अस्य बालकस्य गुरुदेवः अस्माकम् उद्धरिष्यति। संगच्छताम् आवाभ्यां सह स्वामी अपि।

स्वामी सत्यम्? अपि न कुप्यति मयि तव गुरुदेवः?

वासु० सत्यं यत् कथितं मया, अस्माकं गुरुदेवाः नूनं हि करुणामूर्तयः।

स्वामी ओम्। तदा आगच्छामि युवाभ्यां सह।

वासु० साधु। आगच्छतु भद्रः। आगच्छतः उभौ मया सह। (इति निष्क्रांताः। किंचित् अंधकारः, कालेन पुनः प्रकाशः। मध्यपटः उपरि गच्छति। समर्थस्य मठः दृश्यते। नेपथ्ये श्रूयते - इत इतो अंबा, इत इतो मान्यः। ततः प्रविशंति त्रयः।)

वासु० जयतु जयतु श्रीरघुवीरः समर्थः। अत्रभवन्तः हि अस्माकं गुरुदेवाः।

प्रणनमामि गुरुदेवाः। (उभौ अपि प्रणनमतः।)

समर्थः (हस्तेन सूचयते) आसने गृह्णीताम् उभौ। (सस्मितम्) अयि अस्ति एतद् उचितं अत्रभवतः कृत्यम्?

स्वामी अहं घोरः अपराधी, गुरुदेव। तेन एव असह्यः कायदाहः अनुभवामि। न कोऽपि उपायः लब्धः अद्यावधि। भगवान् मां क्षंतुम् अर्हति। (पुनः प्रणनमति।)

(समर्थः तस्य शिरसि हस्तं स्थापयति। तस्य कायदाहः क्षणाद् एव विनश्यति।

स्वामी अहो आश्चर्यम् मम कायदाहः विलीनः।

समर्थः शक्तिः परेशां पीडनाय इति दुर्जनस्य सहजदोषः।

स्वामी जानामि गुरुदेव।

समर्थः तदा किमर्थं दुर्जनो भवसि?

स्वामी अपराद्धं मया।

समर्थः अपि जानासि संपूर्णं श्लोकम्? (स शिरः चालयति।) कथयतु तावत्। (तेन सह सर्वे हस्तौ युंजाना गायंति।)

विद्या विवादाय धनं मदाय शक्तिः परेषां परपीडनाय।
खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय।।

जवनिका



# विठ्ठलः उताहो रामः।

पात्राणि समर्थः, विठ्ठलमंदिरस्य कतिपयाः पुरोहिताः। प्रमुखा जवनिका उपरि गच्छति। कतिपया पुरोहिताः मिथः संलपन्ना दृश्यंते। कतिपयाः स्तोत्रान् पठंति। ततः प्रविशति समर्थः।

स० जयतु श्रीरामः। भवन्तः अत्रस्थाः पुरोहिताः इति मन्यामहे। अपि विठ्ठलस्य दर्शनं कर्तुम् अर्हामहे?

एकः अवश्यमेव। वेषेण संन्यासी दृश्यते भवान्। किमस्मि भवतः नाम?

स० न किंचिदपि विशेषं नाम। वयं साक्षाद् रामस्य दासाः। (सर्वे हसंति।) ततः रामदासाः इति ख्याता वयम्।

अन्यः अस्तु। अत्रभवान् रामस्य स्वामी वा। कुत आगच्छति भवान्?

स० न कोऽपि अस्माकं नामविशेषः, किमुत ग्रामनाम्ना वा? वयं संन्यासिनः अनिकेताः। नैकं ग्रामं अस्माकम्। नैकं सदनं वा। न तिष्ठामः कस्मिन्नपि ग्रामे त्रीन् दिनान् अतिक्रम्य। भ्रमंतः सदैव।

तृ० अत्रभवान् स्वयं रामदासा इति शब्दायते, तदा विठ्ठलस्य दर्शनं किमर्थम्? एतन्न उचितम्। किं मन्यते भवान्?

स० (हसति) शृण्वंतु। कमपि ग्रामं गत्वा तत्र देवदर्शनं तु करणीयम्। भवानपि तथैव कुर्वंति इति मन्यामहे। (सर्वे अनुमन्यंते।) अस्माकमपि एषा परिपाटिः। संप्रति प्रथमं हि पंढरपुरं आगता वयम्। बाल्यादेव श्रुतं विठ्ठलः अत्रस्थः प्रमुखदैवतम् इति। कैः महद्भिः, पुण्यश्लोकैः, प्रातःस्मरणीयैः, महामनोभिः, यथा पुंडलीकमहाराजैः, ज्ञानदेवैः, नामदेवैः, चोखामहोदयैः, अन्यैः कतिभिः सत्पुरुषैः, तथा च प्रतिवर्षं कतिभिः वारकरिभिः संततं पूजितः एष श्रीविठ्ठलः। ततः श्रीविठ्ठलस्य माहात्म्यं यथार्थं जानीमहे। अत एव तस्य दर्शनं पुण्यप्रदं, एवं करणीयम्। (समर्थस्य भाषणेन सर्वे प्रसन्ना भवंति।)

एकः बहु जानीषे भो संन्यासिन्।

स० अस्तु। अपि प्रविशामः?

(सर्वे अनुमोदंते। समर्थः एकद्वारेण निष्क्रांतः, पुरोहिता अन्येन च। मध्यपटलः उपरि गच्छति। दृश्यते भगवतः विठ्ठलस्य प्रसन्ना मूर्तिः। ततः समर्थः प्रविशति, साष्टांगेन नमति, गायति च। पंचषा पुरोहिता अपि प्रविष्टा एके

कोणे तिष्ठंति। समर्थस्य मधुरस्वरेण सर्वे प्रसन्नाः।)

मनः सन्मते भक्तिमार्गो हि सेव्यः
तदा श्रीहरिः प्राप्यते लीलयैव।
जनैर्निंदितं सर्वमेवात्र वर्ज्यं
जनैः श्लाघितं सर्वभावेण कार्यम्।।
जयतु जयतु श्रीरघुवीरः समर्थः।

(सर्वे पुरोहिता झटिति पुरस्सरंति। सकोपम्)

एकः	किमुक्तम्? कथयतु पुनश्च एकवारम्।

स०	किमिव? अस्माभि कथितं जयतु जयतु श्रीरघुवीरः समर्थः इति। किमपि अपराद्धम् अस्माभिः?

अन्यः	महद् अपराद्धम् अत्रभवता। एतत्तु श्रीविठ्ठलस्य मंदिरम्। अत्र तस्यैव जयकारः मान्यः, श्लाघ्यः च। नान्यस्या कस्या अपि देवतायाः। न शोभनीयम्।

स०	(स्मयमानः) एवम्? किंतु वेदा कथयंति, एकं सत् विप्रा बहुधा वदंति, इति। न विठ्ठलः रामश्च भिन्नौ। उभौ एकस्य हि मूलतत्त्वस्य भिन्नरूपधारिणौ। कैः रामः कथ्यते, कैः विठ्ठलः। कुतो भिन्नत्वम्?

अन्यः	(सकोपम्) न जानीमहे वयं तत्किमपि। अत्रभवान् जयकारः कर्तुमिच्छति चेत्, केवलं विठ्ठलस्यः करणीयः, नान्यस्य कस्यापि देवतायाः।

स०	अपि, विठ्ठलः, रामः, हरिः वा एकस्य तत्त्वस्य अवतारा इति न मन्यध्वे भवंतः। अहो आश्चर्यम्।

एकः	वयं किमपि न जानीमहे। एकदा कथितं नु?

स०	अस्तु। अपि काचित् प्रार्थना तु कर्तव्या? अपि प्रार्थना कर्तुं अनुजानीध्वे?

अन्या	कामम्। अत्रभवतः कंठरवः अतिमधुरः भासते। संगीतमपि बहु जानाति। तदा अनुजानीमहे। किं तु प्रार्थना विठ्ठलस्य हि करणीया।

स०	अनुगृहीता वयम्। शृण्वंतु। (हस्तौ युंजानः)
किमिह तिष्ठसि श्रीराम, मनमोहन मेघश्याम।।ध्रु०।।
नात्र लोक्यतेऽयोध्यानगरी, किमिह प्रभवति पंढरिनगरी।।१।।



सीतामातुःस्थले लोकये राहीमाता रुक्मिण्यंबा।।२।।
पश्याम्यत्र न गंगाशरयू वहत्यत्र का चंद्रभागा।।३।।
चापं बाणाः कुत्र विहीनाः करौ स्थापयन् कटिप्रदेशे।।४।।
कुत्र गतस्ते वानरसंघः किमिव संचिता गोपा अधुना।।५।।
यद्भावेन ध्यायति दासः तद्रूपं स्यात् पंढरिरायः।।६।।

(यथा यथा समर्थः गायति, तथा तथा विठ्ठलस्य मूर्तिः श्रीरामरूपेण परिणयते। सर्वे पुरोहिता आश्चर्येण अवलोकंते, समर्थस्य पुरतः प्रणिपत्य प्रणमंति। मुहुर्मुहुः क्षमायाचनं कुर्वंति।)

सर्वे	क्षंतव्या वयम्। अपराद्धाः। न ज्ञातः अत्रभवतः अधिकारः। तेन एव प्रमत्ता वयम्। मन्यामहे रामः, विठ्ठलः, हरिः च एकस्य तत्त्वस्य भिन्नरूपाणि इति। अनुगृह्णातु अत्रभवान् अस्मान् सर्वान्। (समर्थः शिरसा अनुमोदंते।)

स०	अपि अतःपरं मन्यध्वे किं विठ्ठला, रामः, हरिः च, अवतारा इति?

एकः	अत्रभवतः प्रसादादेव अद्य अस्माभिः साक्षाद् रामदर्शनम् अनुभूतम्। सुभगा वयम् सर्वे।

स०	तदा वदंतु सर्वे जयतु जयतु श्रीरघुवीरः समर्थः इति। (सर्वे अनुसरंति।) तथा गायतु मया सह...

(सर्वे मिलित्वा गायंति)

मनः सन्मते भक्तिमार्गो हि सेव्यः
तदा श्रीहरिः प्राप्यते लीलयैव।
जनैर्निंदितं सर्वमेवात्र वर्ज्यं
जनैः श्लाघितं सर्वभावेण कार्यम्।।
जयतु जयतु श्रीरघुवीरः समर्थः।

जवनिका